**Composer:** P.V.R. Narasimha Rao
**Date:** 2015 March 8

**Metre:** Toonaka (quiver of arrows)

**Verse:**

shrI nR^isiMha paMcaratna stotraM

siMhavaktra vajradanta daanavaanta traahi maaM | vajradaMShTra tIkShNavIkSha durnirIkShya paahi maaM |
stambhasambhavesha bhIShma divyasiMha traahi maaM | ugravIra supradIpta shrInR^isiMha paahi maaM ||

yaatuvIrahantR^imukhya daivatAkhya traahi maaM | vairivR^inda vipratIpa supratApa paahi maaM |
raudraveSha daityanAsha bhaktapoSha traahi maaM | ugravIra supradIpta shrInR^isiMha paahi maaM ||

bhaktavatsalesha dainyanAsha divya traahi maaM | bhaktasuprasanna khinnarakSha bhavya paahi maaM |
shiMshumaara paashahaara shrInivaasa traahi maaM | ugravIra supradIpta shrInR^isiMha paahi maaM ||

devavandya siddhapUjya maunisevya traahi maaM | Abhidheya supratIka rANDyarUpa paahi maaM |
yogibhAvya yogavedya bhavyarUpa traahi maaM | ugravIra supradIpta shrInR^isiMha paahi maaM ||

vishvapaala traiguNaatma nirguNesha traahi maaM | sarvamantratantrasaara vedavedya paahi maaM |
bhaktagamya shaaktageya muktapeya traahi maaM | ugravIra supradIpta shrInR^isiMha paahi maaM ||

paMcaratnaM nR^isiMhasya | ye paThanti narottamAH |
te sarve muktimaayaantu | nArasiMha prasaadataH ||

श्री नृसिंह पंचरत्न स्तोत्रं

सिंहवक्त्र वज्रदन्त दानवान्त त्राहि मां । वज्रदंष्ट्र तीक्ष्णवीक्ष दुर्निरीक्ष्य पाहि मां ।
स्तम्भसम्भवेश भीष्म दिव्यसिंह त्राहि मां । उग्रवीर सुप्रदीप्त श्रीनृसिंह पाहि मां ॥

यातुवीरहन्तृमुख्य दैवताख्य त्राहि मां । वैरिवृन्द विप्रतीप सुप्रताप पाहि मां ।
रौद्रवेष दैत्यनाश भक्तपोष त्राहि मां । उग्रवीर सुप्रदीप्त श्रीनृसिंह पाहि मां ॥

भक्तवत्सलेश दैन्यनाश दिव्य त्राहि मां । भक्तसुप्रसन्न खिन्नरक्ष भव्य पाहि मां ।
शिंशुमार पाशहार श्रीनिवास त्राहि मां । उग्रवीर सुप्रदीप्त श्रीनृसिंह पाहि मां ॥

देववन्द्य सिद्धपूज्य मौनिसेव्य त्राहि मां । आभिधेय सुप्रतीक राण्ड्यरूप पाहि मां ।
योगिभाव्य योगवेद्य भव्यरूप त्राहि मां । उग्रवीर सुप्रदीप्त श्रीनृसिंह पाहि मां ॥

विश्वपाल त्रैगुणात्म निर्गुणेश त्राहि मां । सर्वमन्त्रतन्त्रसार वेदवेद्य पाहि मां ।
भक्तगम्य शाक्तगेय मुक्तपेय त्राहि मां । उग्रवीर सुप्रदीप्त श्रीनृसिंह पाहि मां ॥

पंचरत्नं नृसिंहस्य । ये पठन्ति नरोत्तमाः ।
ते सर्वे मुक्तिमायान्तु । नारसिंह प्रसादतः ॥